ISSN: 2456–5474 RNI No.UPBIL/2016/68367 Vol-2* Issue-7* August- 2017
Innovation The Research Concept

# संस्कृतवाङ्मयो विश्व–अभ्युदयश्च

**अशोक कुमार दुबे**
एसोसिएट प्रोफेसर,
संस्कृत विभाग,
बी0 एस0 एन0 वी0 पी0 जी0 कॉलेज,लखनऊ

**सारांश**

विश्वासु सर्वेष्वपि संस्कृत साहित्यधारा युगेष्वप्रतिहतगतिका प्रवहन्ति प्रावर्ततेत्याश्चर्यम्। इतोऽप्यधिकमार्श्चर्य यद् विगतायां प्रवर्तमानायाञ्च शताब्द्यां विशालमुच्चकोटिकं संस्कृत साहित्यमद्यत्वेऽप्याकलनाविषयतां गच्छतीति। संस्कृतभाषायां नैकासामपि भातीयानां भाषाणां जननीत्वं तु निर्विवादमेव। सा सम्प्रति सर्वकारेण प्रदत्तमान्यतासु भाषास्वन्य– तमेत्यवगन्तव्यम्। तस्यां निर्मितमाधुनिकं साहित्यं नैकासां समकालिकीनां भाषाणां साहित्येन समं सुप्रतिष्ठितम्।

**मुख्य शब्द :** प्रेमचंद, किसान, हिन्दी साहित्य।

**प्रस्तावना**

संस्कृतभाषा न केवलं विश्वस्य प्राचीनासु भाषासु अन्यतमा परं तस्यां साहित्यमपि न केवलं शताब्देभ्यः परं सहस्त्राब्देभ्यो निर्मीयमाणमस्तीति नाविदितं समेषाम् विश्वमानवस्य इदं प्रथमतया ज्ञातः ऋग्वेदो नाम प्रथमं काव्यं काव्यं पञ्च सहस्रवर्षेभ्यो प्राक्कलिक इत्यापि निर्विवादमेव। त्यागेन तपसा चानुप्राणितं स्वीयं सांस्कृतिकं निधानमनुसन्धातुं संस्कृत साहित्यमनिवार्यतयाऽस्माभिरवगाह्यते ऋग्वेदादयो वैदिकग्रन्थाः गम्भीरा उपनिषदः अनुपमं वेदाङ्गसाहित्यम् वाल्मीकेरादिकवे रामायणम् संस्कृतभाषामीदृशं साहित्यमस्ति यदद्यत्वेऽस्मिन् नास्ति सन्देहलेशो विवादावसरो वा। पुरातने काले यदाऽन्यदेशीया जना असभ्याः संस्कारहीनाश्च सन्तो यावज्जीतेत्सुखं जीवेदित्यादिमन्त्रं जपन्तः स्वीयं जीवनं यापयन्त आसन् तस्मिन्नेव काले सुसंस्कृता भारतीया मनीषिणः उदात्तसंस्कृतिगुणान्विताः सदाचारोपेता न केवलं भारतीयजनानपितु समस्तमानवलोकं च शिक्षयितुं सर्वतः समर्थाः आसन्। मनुना यदुनास्ति तत्र काचिदतिशयोत्तिः–

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**

अमरीकादेशे निवसता स्वामिविवेकानन्देन भारतीयसंस्कृतेः पाश्चात्यसंस्कृतेश्च यदा भेदमुद्घाट्य भारतीयसंस्कृतिरहस्यं प्रकाशितवान तदाऽनेके जनास्तस्य शिष्यतामङ्गीकृत्य भारतीयसंस्कृतेर्भारतीयदर्शनस्य च रहस्यं विज्ञातुमुद्यता जाताः।

**अध्ययन का उद्देश्य**

कस्याश्चिदपि संस्कृतेः स्वरूपद्वयं भवति बाह्यमान्यतरिकञ्च–। आचारादिकं तस्या बाह्यस्वरूपेण गृह्यते। तदेव धर्मपदेनापि व्यपदिश्यते। आन्तरिके स्वरूपे समाजस्य विचारधारा समायाति, यामाश्रित्य समाजः प्रचलितो भवति। संस्कृतवाङ्मये संस्कृतेरुभयरूपस्य सम्यग् दर्शनं क्रियते। तस्मिन् मानवसमाजस्य सर्वाङ्गीणविकासाय निर्धारितानां चतुर्णां पुरुषार्थानां परमा सत्ता। तस्मिन् धर्मप्रतिपादका वेद–ब्राह्माणारण्यक–स्मृत्यादिग्रन्थाः अर्थपरिबोधकाः कौटिल्यादिकृता अर्थशास्त्रादयः कामप्रतिपादका वात्स्यायनविरचितकामसूत्रादयर तथा मोक्षबोधकाः षड्दर्शनग्रन्थाः विद्यन्तेतराम्। भारतीयसंस्कृतौ धर्मस्य दर्शनस्य चापूर्वा सत्ता विद्यते। तत्र धर्मस्य मुख्यं स्थानम्। अत्रेदमवश्यमेव बोद्धव्यं यद् भारतीयसंस्कृतौ धर्मस्य न तथा सङ्कुचितोऽर्थो गृह्यते यथान्यसंस्कृतिषु। काश्चिद् धर्मपारिभाषा ध्यातव्या –

**धारणाद् धर्म इत्याहुर्धर्मो धारयति प्रजाः।**
**यत् स्याद्धारणसंयुक्तः स धर्म इत्युदाहृतः।।**
**धृतिः क्षमाऽदमोस्तेयं शौचमिन्द्रियनिग्रहः।।**
**धीर्विद्यासत्यमक्रेधे दशकं धर्मलक्षणम्।।**

इत्यादिरीत्या धर्मस्य व्यापकस्वरूमेव भारीतयसंस्कृतौ स्वीक्रियते।

भारतीयसंस्कृतेर्द्वितीयं महत्त्वपूर्णमङ्गं वर्तते दर्शनम्। मानवजीवनस्य परमपुरुषार्थो मोक्षो वर्तते। मोक्षप्राप्तिस्तावन्न भवति यावदात्मज्ञानं न जायते –

**'ऋते ज्ञानान्न मुक्तिः'।**

अस्मेद्देशीया दर्शनिकाः तारस्वरेण उद्घोषयन्ति–

**'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' ।**

वर्णाश्रमव्यवस्था भारतीयसमाजस्य भारतीय संस्कृतेर्वा महनीयोगुणः। गुणकर्मविभागशो निर्मिताश्चत्वारो वर्णास्स्वस्वकर्मणि सम्यक् परिपालयन्त एवं स्वस्य समाजस्य च सेवां विधातुं समर्थाः स्युरित्येतस्य दर्शनं संस्कृतवाङ्मये भवति। 'स्वस्वकर्मण्यभिरतः संसिद्धिं लभते नरः'। वर्ण इव चत्वार आश्रमा अपि समुज्ज्वलरूपेण दृष्टिगोचरतां व्रजन्ति संस्कृते। संस्कृत वाङ्मये ब्रह्मचर्याश्रमस्य गृहस्थाश्रमस्य वानप्रस्थाश्रमस्य संन्यासाश्रामस्य च व्यावहारिकं वर्णनं यत्र तत्रोपलभ्यते।

उदारत्वं समन्वयवादित्वं वा भारतीयसंस्कृतेरपरो महान् गुणः भारतीया संस्कृतिर्भगवती भागीरथीव स्वमध्यपतितान् स्वेतरसंस्कृतिनदीनदान् आत्मरूपेण परिणमयन्ती आत्मसात् कुर्वन्ती व अधुनापि निर्बाधं प्रवहति। भारतीय संस्कृतेरौदार्यरूपं गुणं संस्कृतं पदे पदे धारयति–

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

इयं विश्ववन्द्या कौटुम्बिकीभावना भारतीय संस्कृतेर्महनीयो गुणो यस्य प्रकाशनं संस्कृते पदे पदे जातमस्ति। 'कृण्वन्तो विश्वमार्यमिति मपरमोदात्तां भवनां धारयन्ती भारतीया संस्कृतिः सर्वजनमाङ्गल्यं कामयते। सर्वसौख्यं सर्वनीरोगत्वं मङ्गलपरादृष्टिश्च तस्याः सहजाः गुणाः। भारतीय संस्कृति भव्यभवनभावितो जनो स्वकृते न राज्यं कामयते न स्वर्गं याचते न वा पुनर्जन्म वाञ्छति स केवलं समस्तप्राणिनां दुःखनाशमभिवाञ्छति।

**'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्'।।**
**न त्वहं कामये राज्यं न स्वर्गं नापुनर्भवम्।**
**कामये दुःखतप्तानां प्रणिनामार्तिनाशनम्।।**

अनेकतायामेकतारूपभावो भारतीय संस्कृते रद्भुतंवैशिष्ट्यम्। भारतीया मनीषिणः सर्वेषु प्राणिष्वेकस्यैव आत्मनो दर्शनं कुर्वन्ति। भगवान् कृष्णो गीतायां वदति –

**विद्याविनयमसम्न्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः।।**

सर्वगुणसमुज्जवलभारतीयसंस्कृतिसमुपासकानां भारतीय महापुरुषाणां जीवनगाथा संस्कृत एवं सुगुम्फिता। गुरोः शिष्यस्य मातापित्रोः पुत्रस्य, राज्ञः प्रजायाश्चा दर्शनचरित्राणि संस्कृत एवं सम्यक् चित्रितानि। यानि विज्ञाय न केवलं भारतीयाः प्रत्युत वैदेशिका अपि स्वस्यचरित्रं परिमार्जयितु समर्था भवेयुरिति। कस्मिन् वाङ्मये रामसदृशो राजा वर्तते यो हि लोकस्याराधानाय सहधर्मचारिणीं सीतासदृशीं स्वपत्नीमपि परित्यज्य सहज उद्यतो जातः। श्रीरामो वदति भवभूति विरचित उत्तररामचरिताभिधाने नाटके –

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।**

कस्मिन् साहित्ये सुमित्रासदृशी माता स्वपुत्रं लक्ष्मणेमेवमुपदिशति–

**रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।**
**अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्।।**

**निष्कर्ष**

कस्मिन् साहित्ये भरतोपमाः भ्रातरः हनुमत्सदृशाः निःस्पृहसेवकाः भीमार्जुनसमाः वीराः शिविदधीचि हरिश्चन्द्र सन्निभा राजानः कपिल गौतमकणा दशङ्कराचार्य सन्निभा दार्शनिकाः पाणिनिकात्यायन पतञ्लिसदृशा भाषाविदो वैयाकरणाः जनकनन्दिनीसदृश्यः सतीनार्यः वाल्मीकि व्यासकालिदासादिसमा महाकवयः भारतीयसंस्कृतौ षोडश संस्काराणापूर्वं वैशिष्ट्यम्। संस्कारमन्तरा भारतीयसंस्कृतेः स्वरूपमवगन्तु न पार्यते। तेषां समेषां संस्काराणां विधानं संस्कृतभाषामाध्यमेनैव भवति समस्ते भारते वेदाः संस्कृते निबद्धः मन्त्रैरेव समेषां संस्काराणां धार्मिकविधानं क्रियते। अखिले भारते नैका भाषाः सन्ति। तत्तत्प्रदेशीयाः जनाः स्वमातृभाषायैव दैनन्दिनं व्यवहारं समाचरन्ति। परन्तु संस्कारविधानकाले च सर्वे जनाः विशेषतो हिन्दू धर्मावलम्बिनः संस्कृत भाषामेवाश्रयन्ति। विभिन्न भाषाभाषिणामपि संस्कृत भाषानिबद्ध वैदिकमन्त्रैरेव समे संस्काराः सम्पाद्यन्ते। इत्थं संस्कृतस्याखिल भारतीय स्थिति विद्यते। आध्यात्मिक भावनायाः कृते भारतीय संस्कृति विश्वविदिता। सा खलु भावना संस्कृतवाङ्मय एवं विलसतितराम्। एवं संस्कृतभाषा भारतीय संस्कृते र्वाहिका ऽस्ति।

**संदर्भ ग्रन्थ सूची**

1. *महाभारत – वेदव्यास*
2. *मनुस्मृति – मनु*
3. *ऋग्वेद*
4. *उत्तररामचरितम् – भवभूति*